
Shri Krishna Vrundavana NC

Sujnana Religious & Charitable Foundation



# श्री
# मद्भगवद्गीता



यत्र योगेश्वरो कृष्णः यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिः धृवानीतिर्मतिर्मम ॥

# श्री मद्भगवद्गीता

## Contents


॥ अथ ध्यानम् ॥ ........ 3
॥ अथ प्रथमोध्यायः ॥ अर्जुनविषाद योगः ॥ ........ 5
॥अथ द्वितीयोध्यायः॥ ॥सांख्य योगः॥ ........ 10
॥अथ तृतीयोध्यायः ॥ कर्म योगः॥ ........ 17
॥ अथ चतुर्थोध्यायः ॥ ज्ञानकर्मसंन्यास योगः ॥ ........ 21
॥ अथ पंचमोध्यायः ॥ कर्मसंन्यास योगः ॥ ........ 25
॥ अथ षष्ठोऽध्यायः ॥ आत्मसंयम योगः ॥ ........ 28
॥ अथ सप्तमोध्यायः ॥ ज्ञानविज्ञान योगः ॥ ........ 33
॥ अथ अष्टमोध्यायः ॥ अक्षरब्रह्म योगः ॥ ........ 36
॥ अथ नवमोध्यायः ॥ राजविद्याराजगुह्य योगः ॥ ........ 39
॥ अथ दशमोध्यायः ॥ विभूति योगः ॥ ........ 43
॥ अथ ऐकादशोध्यायः ॥ विश्वरूपदर्शन योगः ॥ ........ 47
॥ अथ द्वादशोध्यायः ॥ भक्ति योगः ॥ ........ 55
॥ अथ त्रयोदशोध्यायः ॥ क्षेत्रक्षेत्रज्ञविभाग योगः ॥ ........ 57
॥ अथ चतुर्दशोध्यायः ॥ गुणत्रयविभाग योगः ॥ ........ 61
॥ अथ पंचदशोध्यायः ॥ पुरुषोत्तम योगः ॥ ........ 64
॥ अथ षोडशोध्यायः ॥ दैवासुरसंपद्विभाग योगः ॥ ........ 67
॥ अथ सप्तदशोध्यायः ॥ श्रद्धात्रयविभाग योगः ॥ ........ 70
॥ अथ अष्टादशोध्यायः ॥ मोक्षसंन्यास योगः ॥ ........ 73




**कृष्णं वंदे जगद्गुरुम्**

॥ हरि: ॐ ॥ श्री गुरुभ्यो नमः ॥
॥ श्री कृष्णाय नमः ॥
॥ अथ ध्यानम् ॥

नारायणं सुरगुरुं जगदेकनाथं भक्तप्रियं सकललोकनमस्कृतं च ।
त्रैगुण्यवर्जितं विभुमाद्यमीशं वंदे भवघ्नं अमरासुरसिद्धवंद्यम् ॥ १॥

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥२॥

वसुदेवसुतं देवं कंस चारून मर्दनम् ।
देवकी परमानंदं कृष्णं वंदे जगद्गुरुम् ॥ ३॥

शांताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभांगम् ।
लक्ष्मीकांतं कमलनयनं योगिभिर्ध्यानगम्यं
वंदे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥४॥

यं ब्रह्मावरुणेंद्ररुद्रमरुतः स्तुन्वंति दिव्यैस्तवैः
वेदैः सांगपदक्रमोपनिषद्यैर्गायंति यंसामगाः ।
ध्यानावस्थित तद्गतेन मनसा पश्यंति यं योगिनो
यस्यांत न विदुः सुरासुरगणाः देवाय तस्मै नमः ॥५॥



॥ ॐ श्री परमात्मने नमः ॥
॥ अथ प्रथमोध्यायः ॥ अर्जुनविषाद योगः ॥

धृतराष्ट्र उवाच
धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पांडवाश्चैव किमकुर्वत संजय ॥१-१।

संजय उवाच
दृष्ट्वातु पांडवानीकं व्यूढं दुर्योधनस्तदा ।
आचार्यमुपसंगम्य राजा वचनमब्रवीत् ॥१-२॥

पश्यैतां पांडुपुत्राणां आचार्य महतीं चमूम् ।
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥१-३॥

अत्र शूराः महेष्वासाः भीमार्जुनसमा युधि।
युयुधानो विराटश्च द्रुपदश्च महारथः ॥१-४॥

धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान् ।
पुरुजित् कुंतिभोजश्च शैभ्यश्च नरपुंगवः ॥१-५॥

युधामन्युश्च विक्रांतः उत्तमौजाश्च वीर्यवान् ।
सौभद्रो द्रौपदेयाश्च सर्व ऐव महारथाः ॥१-६॥

अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ।
नायका मम सैन्यस्य संज्ञार्थं तान् ब्रवीमि ते ॥१-७॥

भवान् भीष्मश्च कर्णश्च कृपश्च समितिंजयः ।
अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥१-८॥

अन्ये च बहवः शूराः मदर्थे त्यक्तजीविताः ।
नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥१-९॥

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ।
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ॥१–१०॥

अयनेषु च सर्वेषु यथाभागमवस्थिताः ।
भीष्ममेवाभिरक्षंतु भवंतः सर्व ऐव हि ॥१–११॥

तस्य संजनयन् हर्षं कुरुवृद्धः पितामहः ।
सिंहनादं विनद्योच्चैः शंखं दध्मौ प्रतापवान् ॥१–१२॥

ततः शंखाश्च भेर्यश्च पणवानकगोमुखाः ।
सहसैवाभ्यहन्यंत स शब्दस्तुमुलोऽभवत् ॥१–१३॥

ततः श्वेतैर्हयैर्युक्ते महति स्यंदने स्थितौ ।
माधवः पांडवश्चैव दिव्यौ शंखौ प्रदध्मतुः ॥१–१४॥

पांचजन्यं हृषीकेशः देवदत्तं धनंजयः ।
पौंड्रं दध्मौ महाशंखं भीमकर्मा वृकोदरः ॥१–१५॥

अनंतविजयं राजा कुंतीपुत्रो युधिष्ठिरः ।
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥१–१६॥

काश्यश्च परमेष्वासः शिखंडी च महारथः ।
धृष्टद्युम्नो विराटश्च सात्यकिश्चाऽपराजितः ॥१–१७॥

द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते ।
सौभद्रश्च महाबाहुः शंखान् दध्मुः पृथक् पृथक् ॥१–१८॥

स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् ।
नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ॥१–१९॥

अथ व्यवस्थितान् दृष्ट्वा धार्तराष्ट्रान् कपिध्वजः ।
प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पांडवः ।१–२०॥

हृषीकेशं तदा वाक्यं इदमाह महीपते ।
अर्जुन उवाच
सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ॥१–२१॥

यावदेतान् निरीक्षेहं योद्धुकामानवस्थितान् ।
कैर्मया सह योद्धव्यं अस्मिन् रणसमुद्यमे ॥१–२२॥

योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः ।
धार्तराष्ट्रस्य दुर्बुद्धेः युद्धे प्रियचिकीर्षवः ॥१–२३॥

संजय उवाच
एवमुक्तो हृषीकेशः गुडाकेशेन भारत ।
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥१–२४॥

भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् ।
उवाच पार्थ पश्यैतान् समवेतान् कुरूनिति ॥१–२५॥

तत्रापश्यत् स्थितान् पार्थः पितॄनथ पितामहान् ।
आचार्यान् मातुलान् भ्रातॄन् पुत्रान् पौत्रान् सखींस्तथा ॥१–२६॥

श्वशुरान् सुहृदश्चैव सेनयोरुभयोरपि ।
तान् समीक्ष्य स कौंतेयः सर्वान् बंधूनवस्थितान् ॥१–२७॥

कृपया परयाऽविष्टः विषीदन् इदमब्रवीत् ।
अर्जुन उवाच
दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ॥१–२८॥

सीदंति मम गात्राणि मुखं च परिशुष्यति ।
वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥१-२९॥

गांडीवं स्रंसते हस्तात् त्वक् चैव परिदह्यते ।
नच शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥१-३०॥

निमित्तानि च पश्यामि विपरीतानि केशव ।
नच श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ॥१-३१॥

न कांक्षे विजयं कृष्ण नच राज्यं सुखानि च ।
किं नो राज्येन गोविंद किं भोगैर्जीवितेन वा ॥१-३२॥

येषामर्थे कांक्षितं नः राज्यं भोगाः सुखानि च ।
त इमेऽवस्थिता युद्धे प्राणान् त्यक्त्वा धनानि च ॥१-३३॥

आचार्याः पितरः पुत्राः तथैव च पितामहाः ।
मातुलाः श्वशुराः पौत्राः श्यालाः संबंधिनस्तथा ॥१-३४॥

ऐतान् न हंतुमिच्छामि घ्नतोऽपि मधुसूदन ।
अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ॥१-३५॥

निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन ।
पापमेवाऽश्रयेदस्मान् हत्वैतान् आततायिनः ॥१-३६॥

तस्मान्नार्हा वयं हंतुं धार्तराष्ट्रान् स्वबांधवान् ।
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥१-३७॥

यद्यप्येते न पश्यंति लोभोपहतचेतसः
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥१-३८॥

कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् ।
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥१–३९॥

कुलक्षये प्रणश्यंति कुलधर्माः सनातनाः ।
धर्मे नष्टे कुलं कृत्स्नं अधर्मोऽभिभवत्युत ॥१–४०॥

अधर्माभिभवात् कृष्ण प्रदुष्यंति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ॥१–४१॥

संकरो नरकायैव कुलघ्नानां कुलस्य च ।
पतंति पितरो ह्येषां लुप्तपिंडोदकक्रियाः ॥१–४२॥

दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः ।
उत्साद्यंते जातिधर्माः कुलधर्माश्च शाश्वताः ॥१–४३॥

उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन ।
नरके नियतं वासः भवतीत्यनुशुश्रुम ॥१–४४॥

अहो बत महत् पापं कर्तुं व्यवसिता वयम् ।
यद्राज्यसुखलोभेन हंतुं स्वजनमुद्यताः ॥१–४५॥

यदि मां अप्रतीकारं अशस्त्रं शस्त्रपाणयः ।
धार्तराष्ट्राः रणे हन्युः तन्मे क्षेमतरं भवेत् ॥१–४६॥

संजय उवाच
ऐवमुक्त्वाऽर्जुनः संख्ये रथोपस्थ उपाविशत् ।
विसृज्य सशरं चापं शोकसंविग्नमानसः ॥१–४७॥

ॐ तत्सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अर्जुनविषादयोगो नाम प्रथमोध्यायः ॥श्री कृष्णार्पणमस्तु ॥

॥ ॐ श्री परमात्मने नमः ॥
॥अथ द्वितीयोऽध्यायः॥ ॥सांख्य योगः॥

संजय उवाच
तं तथा कृपयाऽऽविष्टं अश्रुपूर्णाकुलेक्षणम् ।
विषीदंतमिदं वाक्यं उवाच मधुसूदनः ॥२–१॥

श्री भगवानुवाच
कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्यजुष्टमस्वर्ग्यं अकीर्तिकरमर्जुन ॥२–२॥

क्लैब्यं मा स्मगमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप ॥२–३॥

अर्जुन उवाच
कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन ।
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥२–४॥

गुरूनहत्वा हि महानुभावान्
श्रेयो भोक्तुम् भैक्ष्यमपीह लोके ।
हत्वाऽर्थकामांस्तु गुरूनिहैव
भुंजीय भोगान् रुधिरप्रदिग्धान् ॥२–५॥

न चैतद्विद्मः कतरन्नो गरीयः
यद्वा जयेम यदि वा नो जयेयुः ।
यानेव हत्वा न जिजीविषामः
तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥२–६॥

कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्मसम्मूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥२–७॥

न हि प्रपश्यामि ममापनुद्यात्
यच्छोकमुच्छोषणमिंद्रियाणाम् ।
अवाप्य भूमावसपत्नमृद्धं
राज्यं सुराणामपि चाऽधिपत्यम् ॥२–८॥

संजय उवाच
ऐवमुक्त्वा हृषीकेशं गुडाकेशः परंतपः ।
न योत्स्य इति गोविंदं उक्त्वा तूष्णीं बभूव ह ॥२-९॥

तमुवाच हृषीकेशः प्रहसन्निव भारत ।
सेनयोरुभयोर्मध्ये विषीदंतमिदं वचः ॥२-१०॥

श्री भगवानुवाच
अशोच्यान् अन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासून् अगतासूंश्च नानुशोचंति पंडिताः ॥२-११॥

नत्वेवाहं जातु नाऽसं न त्वं नेमे जनाधिपाः ।
नचैव न भविष्यामः सर्वे वयमतः परम् ॥२-१२॥

देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा ।
तथा देहांतरप्राप्तिः धीरस्तत्र न मुह्यति ॥२-१३॥

मात्रास्पर्शास्तु कौंतेय शीतोष्णसुखदुःखदाः ।
आगमापायिनोऽनित्याः तांस्तितिक्षस्व भारत ॥२-१४॥

यं हि न व्यथयंत्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥१५॥

नासतो विद्यते भावः नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽंतः त्वनयोस्तत्वदर्शिभिः ॥२-१६॥

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित् कर्तुमर्हति ॥२-१७॥

अंतवंत इमे देहाः नित्यस्योक्ताः शरीरिणः ।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥२-१८॥

य ऐनं वेत्ति हंतारं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतः नायं हंति न हन्यते ॥२-१९॥

न जायते म्रियते वा कदाचित्
नाऽयं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणः
न हन्यते हन्यमाने शरीरे ॥२–२०॥

वेदाविनाशिनं नित्यं य ऐनमजमव्ययम् ।
कथं स पुरुषः पार्थ कं घातयति हंति कम् ॥२–२१॥

वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णानि
अन्यानि संयाति नवानि देही ॥२–२२॥

नैनं छिंदंति शस्त्राणि नैनं दहति पावकः ।
नचैनं क्लेदयंत्यापः न शोषयति मारुतः ॥२–२३॥

अच्छेद्योऽयं अदाह्योऽयं अक्लेद्योऽशोष्य ऐव च ।
नित्यः सर्वगतः स्थाणुः अचलोऽयं सनातनः ॥२–२४॥

अव्यक्तोऽयं अचिंत्योऽयं अविकार्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥२–२५॥

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथाऽपि त्वं महाबाहो नैवं शोचितुमर्हसि ॥२–२६॥

जातस्य हि ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य च ।
तस्मात् अपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥२–२७॥

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥२–२८॥

आश्चर्यवत्पश्यति कश्चिदेनं
आश्चर्यवद्वदति तथैव चान्यः ।
आश्चर्यवच्चैनमन्यः शृणोति
श्रुत्वाऽप्येनं वेद नचैव कश्चित् ॥२–२९॥

देही नित्यमवध्योऽयं देहे सर्वस्य भारत ।
तस्मात् सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥२–३०॥

स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते ॥२–३१॥

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभंते युद्धमीदृशम् ॥२–३२॥

अथ चेत् त्वमिमं धर्म्यं संग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥२–३३॥

अकीर्तिं चापि भूतानि कथयिष्यंति तेऽव्ययाम् ।
संभावितस्य चाकीर्तिः मरणादतिरिच्यते ॥२–३४॥

भयाद् रणादुपरतं मंस्यंते त्वां महारथाः ।
येषां च त्वं बहुमतः भूत्वा यास्यसि लाघवम् ॥२–३५॥

अवाच्यवादांश्च बहून् वदिष्यंति तवाहिताः ।
निंदंतस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥२–३६॥

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ।
तस्मादुत्तिष्ठ कौंतेय युद्धाय कृतनिश्चयः ॥२–३७॥

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥२–३८॥

ऐषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ।
बुद्ध्या युक्तो यया पार्थ कर्मबंधं प्रहास्यसि ॥२–३९॥

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥२–४०॥

व्यवसायात्मिका बुद्धिः ऐकेह कुरुनंदन ।
बहुशाखा ह्यनंताश्च बुद्धयोऽव्यवसायिनाम् ॥२–४१॥

यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः ।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥२–४२॥

कामात्मानः स्वर्गपराः जन्मकर्मफलप्रदाम् ।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥२–४३॥

भोगैश्वर्यप्रसक्तानां तयाऽपहृतचेतसाम् ।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥२–४४॥

त्रैगुण्यविषया वेदाः निस्त्रैगुण्यो भवार्जुन ।
निर्द्वंद्वो नित्यसत्वस्थः निर्योगक्षेम आत्मवान् ॥२–४५॥

य़ावानर्थ उदपाने सर्वतः संप्लुतोदके ।
तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥२–४६॥

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूः मा ते संगोऽस्त्वकर्मणि ॥२–४७॥

योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय ।
सिद्धसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥२–४८॥

दूरेण ह्यवरं कर्म बुद्धियोगात् धनंजय ।
बुद्धौ शरणं अन्विच्छ कृपणाः फलहेतवः ॥२–४९॥

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥२–५०॥

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ।
जन्मबंधविनिर्मुक्ताः पदं गच्छंत्यनामयम् ॥२–५१॥

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥२–५२॥

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिः तदा योगमवाप्स्यसि ॥२–५३॥

अर्जुन उवाच
स्थितप्रज्ञस्य का भाषा समाधिस्तस्य केशव ।
स्तितधीः किं प्रभाषेत किमासीत व्रजेत किं ॥२–५४॥

श्री भगवानुवाच
प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् ।
आत्मन्येवाऽत्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥२–५५॥

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥२–५६॥

यः सर्वत्रानभिस्नेहः तत्तत्प्राप्य शुभाशुभम् ।
नाभिनंदति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥२–५७॥

यदा संहरते चायं कूर्मोऽंगानीव सर्वशः ।
इंद्रियाणींद्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता ॥२–५८॥

विषया विनिवर्तंते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥२–५९॥

यततो ह्यपि कौंतेय पुरुषस्य विपश्चितः ।
इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः ॥२–६०॥

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥२–६१॥

ध्यायतो विषयान् पुंसः संगस्तेषूपजायते ।
संगात् संजायते कामः कामात् क्रोधोऽभिजायते ॥२–६२॥

क्रोधाद्भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः ।
स्मृतिभ्रंशात् बुद्धिनाशः बुद्धिनाशात् प्रणश्यति ॥२–६३॥

रागद्वेषवियुक्तैस्तु विषयानिंद्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥२–६४॥

प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठति ॥२–६५॥

नास्ति बुद्धिरयुक्तस्य नचा युक्तस्य भावना ।
न चा भावयतः शांतिः अशांतस्य कुतः सुखम् ॥२–६६॥

इंद्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवांभसि ॥२–६७॥

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।
इंद्रियाणींद्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता ॥२–६८॥

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥२–६९॥

आपूर्यमाणमचलप्रतिष्ठं
समुद्रमापः प्रविशंति यद्वत् ।
तद्वत्कामा यं प्रविशंति सर्वे
स शांतिमाप्नोति न कामकामी ॥२–७०॥

विहाय कामान्यः सर्वान् पुमांश्चरति निःस्पृहः ।
निर्ममो निरहंकारः स शांतिमधिगच्छति ॥२–७१॥

ऐषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वाऽस्यामंतकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥२–७२॥

ॐ तत्सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे सांख्ययोगो नाम द्वितीयोध्यायः
॥श्री कृष्णार्पणमस्तु ॥

॥ ॐ श्री परमात्मने नमः ॥
॥अथ तृतीयोध्यायः ॥ कर्म योगः॥

अर्जुन उवाच
ज्यायसी चेत् कर्मणस्ते मता बुद्धिर्जनार्दन ।
तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥३-१॥

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे ।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥३-२॥

श्री भगवानुवाच
लोकेस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघा ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् ॥३-३॥

न कर्मणां अनारंभात् नैष्कर्म्यं पुरुषोश्नुते ।
नच संन्यसनादेव सिद्धिं समधिगच्छति ॥३-४॥

न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥३-५॥

कर्मेंद्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इंद्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते ॥३-६॥

यस्तु इंद्रियाणि मनसा नियम्याऽरभतेऽर्जुन ।
कर्मेंद्रियैः कर्मयोगं असक्तः स विशिष्यते ॥३-७॥

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्राऽपि च ते न प्रसिद्ध्येदकर्मणः ॥३-८॥

यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबंधनः ।
तदर्थं कर्म कौंतेय मुक्तसंगः समाचर ॥३-९॥

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्वं ऐष वोऽस्त्विष्टकामधुक् ॥३-१०॥

देवान् भावयतानेन ते देवा भावयंतु वः ।
परस्परं भावयंतः श्रेयः परमवाप्स्यथ ॥३-११।

इष्टान् भोगान् हि वो देवाः दास्यंते यज्ञभाविताः ।
तैर्दत्तान् अप्रदायैभ्यः यो भुंक्ते स्तेन ऐव सः ॥३-१२॥

यज्ञशिष्टाशिनः संतः मुच्यंते सर्वकिल्बिषैः ।
भुंजते ते त्वघं पापाः ये पचंत्यात्मकारणात् ॥३-१३॥

अन्नाद् भवंति भूतानि पर्जन्याद् अन्नसंभवः ।
यज्ञाद् भवति पर्जन्यः यज्ञ कर्मसमुद्भवः ॥३-१४।

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् ।
तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥३-१५॥

ऐवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ।
अघायुरिंद्रियारामः मोघं पार्थ स जीवति ॥३-१६॥

यस्त्वात्मरतिरेव स्यात् आत्मतृप्तश्च मानवः ।
आत्मन्येव च संतुष्टः तस्य कार्यं न विद्यते ॥३-१७॥

नैव तस्य कृतेनार्थः नाकृतेनेह कश्चन ।
नचास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥३-१८॥

तस्मादसक्तः सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः ॥३-१९॥

कर्मणैव हि संसिद्धिं आस्थिता जनकादयः ।
लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि ॥३-२०॥

यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः ।
स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते ॥३-२१॥

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन ।
नानवाप्तम् अवाप्तव्यं वर्त ऐव च कर्मणि ॥३-२२॥

यदि ह्यहं न वर्तेयं जातु कर्मण्यतंद्रितः ।
मम वर्त्मानुवर्तंते मनुष्याः पार्थ सर्वशः ॥३-२३॥

उत्सीदेयुरिमे लोकाः न कुर्यां कर्म चेदहम् ।
संकरस्य च कर्ता स्यां उपहन्यामिमाः प्रजाः ॥३–२४॥

सक्ताः कर्मण्यविद्वांसः यथा कुर्वंति भारत ।
कुर्याद् विद्वांस्तथासक्तः चिकीर्षुर् लोकसंग्रहम् ॥३–२५॥

न बुद्धिबेधं जनयेत् अज्ञानां कर्मसंगिनाम् ।
जोषयेत् सर्वकर्माणि विद्वान् युक्तः समाचरन् ॥३–२६॥

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहंकारविमूढात्मा कर्ताऽहं इति मन्यते ॥३–२७॥

तत्ववित्तु महाबाहो गुणकर्म विभागयोः ।
गुणा गुणेषु वर्तंते इति मत्वा न सज्जते ॥३–२८॥

प्रकृतेर्गुणसम्मूढाः सज्जंते गुणकर्मसु ।
तानकृत्स्नविदो मंदान् कृत्स्नविन्न विचालयेत् ॥३–२९॥

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥३–३०॥

ये मे मतमिदं नित्यं अनुतिष्ठंति मानवाः ।
श्रद्धावंतोऽनसूयंतः मुच्यंते तेऽपि कर्मभिः ॥३–३१॥

ये त्वेतदभ्यसूयंतः नानुतिष्ठंति मे मतम् ।
सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः ॥३–३२॥

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यांति भूतानि निग्रहः किं करिष्यति ॥३–३३॥

इंद्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत् तौ ह्यस्य परिपंथिनौ ॥३–३४॥

श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥३–३५॥

अर्जुन उवाच
अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥३–३६॥

श्री भगवानुवाच
काम एष क्रोध एषः रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥३–३७॥

धूमेनाव्रियते वह्निः यथाऽदर्शो मलेन च ।
यथोल्बेनावृतो गर्भः तथा तेनेदमावृतम् ॥३–३८॥

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौंतेय दुष्पूरेणानलेन च ॥३–३९॥

इंद्रियाणि मनोबुद्धिः अस्याधिष्ठानमुच्यते ।
ऐतैर्विमोहयत्येषः ज्ञानमावृत्य देहिनम् ॥३–४०॥

तस्मात्त्वं इंद्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥३–४१॥

इंद्रियाणि परण्याहुः इंद्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिः यो बुद्धेः परतस्तु सः ॥३–४२॥

ऐवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥३–४३॥

ॐ तत्सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मयोगो नाम तृतीयोध्यायः
॥श्री कृष्णार्पणमस्तु ॥

॥ ॐ श्री परमात्मने नमः ॥
॥ अथ चतुर्थोध्यायः ॥ ज्ञानकर्मसंन्यास योगः ॥

श्री भगवानुवाच
इमं विवस्वते योगं प्रोक्तवान् अहमव्ययम् ।
विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥४-१॥

ऐवं परंपराप्राप्तं इमं राजर्षयो विदुः ।
स कालेनेह महता योगोनष्टः परंतप ॥४-२॥

स ऐवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥४-३॥

अर्जुन उवाच
अपरं भवतो जन्म परं जन्म विवस्वतः ।
कथमेतद् विजानीयां त्वमादौ प्रोक्तवानिति ॥४-४॥

श्री भगवानुवाच
बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ॥४-५॥

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ॥४-६॥

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदाऽत्मानं सृजाम्यहम् ॥४-७॥

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥४-८॥

जन्म कर्म च मे दिव्यं ऐवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥४-९॥

वीतरागभयक्रोधाः मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥४-१०॥

ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तंते मनुष्याः पार्थ सर्वशः ॥४–११॥

कांक्षंतः कर्मणां सिद्धिं यजंत इह देवताः ।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥४–१२॥

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥४–१३॥

न मां कर्माणि लिंपंति न मे कर्मफले स्पृहा ।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥४–१४॥

ऐवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥४–१५॥

किं कर्म किं अकर्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥४–१६॥

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥४–१७॥

कर्मण्यकर्म यः पश्येत् अकर्मणि च कर्म यः ।
स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥४–१८॥

यस्य सर्वे समारंभाः कामसंकल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पंडितं बुधाः ॥४–१९॥

त्यक्त्वा कर्मफलासंगं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोऽपि नैव किंचित् करोति सः ॥४–२०॥

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाऽप्नोति किल्बिषम् ॥४–२१॥

यदृच्छालाभसंतुष्टः द्वंद्वातीतो विमत्सरः ।
समः सिद्धावसिद्धौ च कृत्वाऽपि न निबध्यते ॥४–२२॥

गतसंगस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञायाऽचरतः कर्म समग्रं प्रविलीयते ॥४–२३॥

ब्रह्मार्पणं ब्रह्महविः ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गंतव्यं ब्रह्म कर्म समाधिना ॥४–२४॥

दैवमेवापरे यज्ञं योगिनः पर्युपासते ।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥४–२५॥

श्रोत्रादीन् इंद्रियाण्यन्ये संयमाग्निषु जुह्वति ।
शब्दादीन् विषयानन्ये इंद्रियाग्निषु जुह्वति ॥४–२६॥

सर्वाणींद्रियकर्माणि प्राणकर्माणि चापरे ।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥४–२७॥

द्रव्ययज्ञास्तपोयज्ञाः योगयज्ञास्तथापरे ।
स्वाध्याय ज्ञानयज्ञाश्च यतयः संशितव्रताः ॥४–२८॥

अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे ।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥४–२९॥

अपरे नियताहाराः प्राणान् प्राणेषु जुह्वति ।
सर्वेप्येते यज्ञविदः यज्ञक्षपितकल्मषाः ॥४–३०॥

यज्ञशिष्टामृतभुजः यांति ब्रह्म सनातनम् ।
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥४–३१॥

ऐवं बहुविधा यज्ञाः वितता ब्रह्मणो मुखे ।
कर्मजान् विद्धि तान्सर्वान् ऐवं ज्ञात्वा विमोक्ष्यसे ॥४–३२॥

श्रेयान् द्रव्यमयाद् यज्ञात् ज्ञानयज्ञः परंतप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥४–३३॥

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यंति ते ज्ञानं ज्ञानिनः तत्त्वदर्शिनः ॥४–३४॥

यज्ञात्वा न पुनर्मोहं ऐवं यास्यसि पांडव ।
येन भूतान्यशेषेण द्रक्ष्यस्याऽत्मन्यथो मयि ॥४–३५॥

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥४–३६॥

यथैदांसि समिद्धोग्निः भस्मसात् कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा ॥४–३७॥

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत् स्वयं योगसंसिद्धः कालेनाऽत्मनि विंदति ॥४–३८॥

श्रद्धावान् लभते ज्ञानं तत्परः संयतेंद्रियः ।
ज्ञानं लब्ध्वा परां शांतिं अचिरेणाधिगच्छति ॥४–३९॥

अज्ञश्चाश्रद्धधानश्च संशयात्मा विनश्यति ।
नायं लोकोऽस्ति न परः न सुखं संशयात्मनः ॥४–४०॥

योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम् ।
आत्मवंतं न कर्माणि निबध्नंति धनंजय ॥४–४१॥

तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनाऽत्मनः ।
छित्त्वैनं संशयं योगं आतिष्ठोत्तिष्ठ भारत ॥४–४२॥

ॐ तत्सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
ज्ञानकर्मसंन्यासयोगो नाम चतुर्थोध्यायः
॥श्री कृष्णार्पणमस्तु ॥

॥ ॐ श्री परमात्मने नमः ॥
॥ अथ पंचमोध्यायः ॥ कर्मसंन्यास योगः ॥

अर्जुन उवाच
संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय ऐतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥५-१॥

श्री भगवानुवाच
संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते ॥५-२॥

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न कांक्षति ।
निर्द्वंद्वो हि महाबाहो सुखं बंधात् प्रमुच्यते ॥५-३॥

सांख्ययोगौ पृथग् बालाः प्रवदंति न पंडिताः ।
ऐकमप्यास्थितः सम्यक् उभयोर्विंदते फलम् ॥५-४॥

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।
ऐकं सांख्यं च योगं च यः पश्यति स पश्यति ॥५-५॥

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।
योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ॥५-६॥

योगयुक्तो विशुद्धात्मा विजितात्मा जितेंद्रियः ।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥५-७॥

नैव किंचित् करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् गच्छन् स्वपन् श्वसन् ॥५-८॥

प्रलपन् विसृजन् गृह्णन् उन्मिशन् निमिषन्नपि ।
इंद्रियाणींद्रियार्थेषु वर्तंत इति धारयन् ॥५-९॥

ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवांभसा ॥५-१०॥

कायेन मनसा बुद्ध्या केवलैरिंद्रियैरपि ।
योगिनः कर्म कुर्वंति संगं त्यक्त्वाऽत्मशुद्धये ॥५-११॥

युक्तः कर्मफलं त्यक्त्वा शांतिं आप्नोति नैष्ठिकीम् ।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥५–१२॥

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी ।
नवद्वारे पुरे देही नैव कुर्वन् न कारयन् ॥५–१३॥

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥५–१४॥

नादत्ते कस्यचित् पापं न चैव सुकृतं विभुः ।
अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः ॥५–१५॥

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।
तेषामादित्यवत्–ज्ञानं प्रकाशयति तत्परम् ॥५–१६॥

तद् बुद्धयस्तदात्मानः तन्निष्ठास्तत् परायणाः ।
गच्छंत्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥५–१७॥

विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पंडिताः समदर्शिनः ॥५–१८॥

इहैव तैर्जितः सर्गः येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद् ब्रह्मणि ते स्थिताः ॥५–१९॥

न प्रहृष्येत् प्रियं प्राप्य नोद्विजेत् प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसम्मूढः ब्रह्मवित् ब्रह्मणि स्थितः ॥५–२०॥

बाह्यस्पर्शेषु असक्तात्मा विंदत्यात्मनि यत् सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ॥५–२१॥

ये हि संस्पर्शजा भोगाः दुःखयोनय एव ते ।
आद्यंतवंतः कौंतेय न तेषु रमते बुधः ॥५–२२॥

शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् ।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥५–२३॥

योंतःसुखोऽंतरारामः तथांतर्ज्योतिरेव यः ।
स योगी ब्रह्म निर्वाणं ब्रह्मभूतोधिगच्छति ॥५-२४॥

लभंते ब्रह्मनिर्वाणं ऋषयः क्षीणकल्मषाः ।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥५-२५॥

कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ॥५-२६॥

स्पर्शान् कृत्वा बहिर्बाह्यान् चक्षुश्चैवांतरे भ्रुवोः ।
प्राणापानौ समौ कृत्वा नासाभ्यंतरचारिणौ ॥५-२७॥

यतेंद्रियमनोबुद्धिः मुनिर्मोक्षपरायणः ।
विगतेच्छाभयक्रोधः यः सदा मुक्त ऐव सः ॥५-२८॥

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शांतिमृच्छति ॥५-२९॥

ॐ तत्सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मसंन्यासयोगो नाम पंचमोध्यायः
॥श्री कृष्णार्पणमस्तु ॥

॥ ॐ श्री परमात्मने नमः ॥
॥ अथ षष्ठोऽध्यायः ॥ आत्मसंयम योगः ॥

श्री भगवानुवाच
अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥६-१॥

यं संन्यासमिति प्राहुः योगं तं विद्धि पांडव ।
नह्य संन्यस्तसंकल्पः योगी भवति कश्चन ॥६-२॥

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥६-३॥

यदा हि नेंद्रियार्थेषु न कर्मस्वनुषज्जते ।
सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ॥६-४॥

उद्धरेदात्मनाऽत्मानं नाऽत्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बंधुः आत्मैव रिपुरात्मनः ॥६-५॥

बंधुरात्माऽत्मनस्तस्य येनाऽत्मैवात्मना जितः ।
अनात्मनस्तु शत्रुत्वे वर्तेताऽत्मैव शत्रुवत् ॥६-६॥

जितात्मनः प्रशांतस्य परमात्मा समाहितः ।
शीतोष्णसुखदुःखेषु तथा मानापमानयोः ॥६-७॥

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेंद्रियः ।
युक्त इत्युच्यते योगी समलोष्टाश्मकांचनः ॥६-८॥

सुहृन्मित्रार्युदासीन मध्यस्थद्वेष्यबंधुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥६-९॥

योगी युंजीत सततं आत्मानं रहसि स्थितः ।
ऐकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥६-१०॥

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥६-११॥

तत्रैकाग्रं मनः कृत्वा यतचित्तेंद्रियक्रियः ।
उपविश्याऽसने युंज्यात् योगमात्मविशुद्धये ॥६–१२॥

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥६–१३॥

प्रशांतात्मा विगतभीः ब्रह्मचारिव्रते स्थितः ।
मनः संयम्य मच्चित्तः युक्त आसीत मत्परः ॥६–१४॥

युंजन्नेवं सदाऽत्मानं योगी नियतमानसः ।
शांतिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥६–१५॥

नात्यश्नतस्तु योगोऽस्ति न चैकांतमनश्नतः ।
नचातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥६–१६॥

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥६–१७॥

यदा विनियतं चित्तं आत्मन्येवावतिष्ठते ।
निःस्पृहः सर्वकामेभ्यः युक्त इत्युच्यते तदा ॥६–१८॥

यथा दीपो निवातस्थः नेंगते सोपमा स्मृता ।
योगिनो यतचित्तस्य युंजतो योगमात्मनः ॥६–१९॥

यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनाऽत्मानं पश्यन्नात्मनि तुष्यति ॥६–२०॥

सुखमात्यंतिकं यत्तत् बुद्धिग्राह्यमतींद्रियम् ।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥६–२१॥

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मिन् स्थितो न दुःखेन गुरुणा अपि विचाल्यते ॥६–२२॥

तं विद्याद् दुःखसंयोग वियोगं योगसंज्ञितम् ।
स निश्चयेन योक्तव्यः योगो निर्विण्णचेतसा ॥६–२३॥

संकल्पप्रभवान् कामान् त्यक्त्वा सर्वानशेषतः ।
मनसैवेंद्रियग्रामं विनियम्य समंततः ॥६-२४॥

शनैः शनैरुपरमेत् बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत् ॥६-२५॥

यतो यतो निश्चरति मनश्चंचलमस्थिरम् ।
ततस्ततो नियम्यैतत् आत्मन्येव वशं नयेत् ॥६-२६॥

प्रशांतमनसं ह्येनं योगिनं सुखमुत्तमं ।
उपैति शांतरजसं ब्रह्मभूतमकल्मषम् ॥६-२७॥

युंजन्नेवं सदाऽत्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंस्पर्शं अत्यंतं सुखमश्नुते ॥६-२८॥

सर्वभूतस्थमात्मानं सर्वभूतानि चाऽत्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥६-२९॥

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥६-३०॥

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥६-३१॥

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥६-३२॥

अर्जुन उवाच
योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन ।
ऐतस्याहं न पश्यामि चंचलत्वात् स्थितिं स्थिराम् ॥६-३३॥

चंचलं हि मनः कृष्ण प्रमाथि बलवद्धृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥६-३४॥

श्री भगवानुवाच
असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौंतेय वैराग्येण च गृह्यते ।]६-३५॥

असंयतात्मना योगः दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥६–३६॥

अर्जुन उवाच
अयतिः श्रद्धयोपेतः योगाच्चलितमानसः ।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥६–३७॥

कच्चिन्नोभयविभ्रष्टः छिन्नाभ्रमिव नश्यति ।
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥६–३८॥

ऐतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः ।
त्वदन्यः संशयस्यास्य चेत्ता न ह्युपपद्यते ॥६–३९॥

श्री भगवानुवाच
पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ।
न हि कल्याणकृत् कश्चित् दुर्गतिं तात गच्छति ॥६–४०॥

प्राप्य पुण्यकृतां लोकान् उषित्वा शाश्वतीः समाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥६–४१॥

अथवा योगिनामेव कुले भवति धीमताम् ।
ऐतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥६–४२॥

तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् ।
यतते च ततो भूयः संसिद्धौ कुरुनंदन ॥६–४३॥

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः ।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥६–४४॥

प्रयत्नाद् यतमानस्तु योगी संशुद्धकिल्बिषः ।
अनेकजन्मसंसिद्धः ततो याति परां गतिम् ॥६–४५॥

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः ।
कर्मिभ्यश्चाधिको योगी तस्माद् योगी भवार्जुन ॥६–४६॥

योगिनामपि सर्वेषां मद्गतेनांतरात्मना ।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥६-४७॥

ॐ तत्सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे आत्मसंयमयोगो नाम षष्ठोध्यायः
॥श्री कृष्णार्पणमस्तु ॥

॥ ॐ श्री परमात्मने नमः ॥
॥ अथ सप्तमोऽध्यायः ॥ ज्ञानविज्ञान योगः ॥

श्री भगवानुवाच
मय्यासक्तमनाः पार्थ योगं युंजन्मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥७-१॥

ज्ञानं तेऽहं सविज्ञानं इदं वक्ष्याम्यशेषतः ।
यज्ज्ञात्वा नेह भूयोऽन्यत् ज्ञातव्यमवशिष्यते ॥७-२॥

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥७-३-॥

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥७-४॥

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥७-५॥

ऐतद्योनीनि भूतानि सर्वाणीत्युपधारय ।
अहं कृत्स्नस्य जगतः प्रभवः प्रळयस्तथा ॥७-६॥

मत्तः परतरं नान्यत् किंचिदस्ति धनंजय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥७-७॥

रसोऽहं अप्सु कौंतेय प्रभास्मि शशिसूर्ययोः ।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥७-८॥

पुण्यो गंधः पृथिव्यां च तेजश्चास्मि विभावसौ ।
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥७-९॥

बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् ।
बुद्धिर्बुद्धिमतां अस्मि तेजस् तेजस्विनामहम् ॥७-१०॥

बलं बलवतां चाहं कामरागविवर्जितम् ।
धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥७-११॥

ये चैव सात्त्विका भावा: राजसास्तामसाश्च ये ।
मत्त ऐवेति तान्विद्धि न त्वहं तेषु ते मयि ॥७–१२॥

त्रिभिर्गुणमयैर्भावै: ऐभि: सर्वमिदं जगत् ।
मोहितं नाभिजानाति मामेभ्य: परमव्ययम् ॥७–१३॥

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यंते मायामेतां तरंति ते ॥७–१४॥

न मां दुष्कृतिनो मूढा: प्रपद्यंते नराधमा: ।
माययाऽपहृतज्ञाना: आसुरं भावमाश्रिता: ॥७–१५॥

चतुर्विधा भजंते मां जना: सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥७–१६॥

तेषां ज्ञानी नित्ययुक्त: ऐकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थं अहं स च मम प्रिय: ॥७–१७॥

उदारा: सर्व ऐवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थित: स हि युक्तात्मा मामेवानुत्तमां गतिं ॥७–१८॥

बहूनां जन्मनामंते ज्ञानवान् मां प्रपद्यते ।
वासुदेव: सर्वमिति स महात्मा सुदुर्लभ: ॥७–१९॥

कामैस्तैस्तैर्हृतज्ञाना: प्रपद्यंतेऽन्यदेवता: ।
तं तं नियममास्थाय प्रकृत्या नियता: स्वय़ा ॥७–२०॥

यो यो यां यां तनुं भक्त: श्रद्धयाऽर्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥७–२१॥

स तया श्रद्धया युक्त: तस्याऽराधनमीहते ।
लभते च तत: कामान् मयैव विहितान् हि तान् ॥७–२२॥

अंतवत्तु फलं तेषां तद् भवत्यल्पमेधसाम् ।
देवान् देवयजो यांति मद्भक्ता यांति मामपि ॥७–२३॥

अव्यक्तं व्यक्तिमापन्नं मन्यंते मां अबुद्धयः ।
परं भावमजानंतः ममाव्ययमनुत्तमम् ॥७–२४॥

नाहं प्रकाशः सर्वस्य योगमायासमावृतः ।
मूढोऽयं नाभिजानाति लोको मां अजमव्ययं ॥७–२५॥

वेदाहं समतीतानि वर्तमानानि चार्जुन ।
भविष्याणि च भूतानि मां तु वेद न कश्चन ॥७–२६॥

इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत ।
सर्वभूतानि सम्मोहं सर्गे यांति परंतप ॥७–२७॥

येषां त्वंतगतं पापं जनानां पुण्यकर्मणाम् ।
ते द्वंद्वमोहनिर्मुक्ताः भजंते मां दृढव्रताः ॥७–२८॥

जरामरणमोक्षाय मामाश्रित्य यतंति ये ।
ते ब्रह्म तद्विदुः कृत्स्नं अध्यात्मं कर्म चाखिलम् ॥७–२९॥

साधिभूताधिदैवं मां साधियज्ञं च ये विदुः ।
प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः ।७–३०॥

ॐ तत्सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
ज्ञानविज्ञानयोगो नाम सप्तमोध्यायः
॥श्री कृष्णार्पणमस्तु ॥

॥ ॐ श्री परमात्मने नमः ॥
॥ अथ अष्टमोध्यायः ॥ अक्षरब्रह्म योगः ॥

अर्जुन उवाच

किं तद् ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम ।
अधिभूतं च किं प्रोक्तं अधिदैवं किमुच्यते ॥८-१॥

अधियज्ञः कथं कोऽत्र देहेऽस्मिन् मधुसूदन ।
प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ॥८-२॥

श्री भगवानुवाच

अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ।
भूतभावोद्भवकरः विसर्गः कर्मसंज्ञितः ॥८-३॥

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम् ।
अधियज्ञोऽहमेवात्र देहे देहभृतां वर ॥८-४॥

अंतकाले च मामेव स्मरन् मुक्त्वा कलेवरम् ।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥८-५॥

यं यं वाऽपि स्मरन् भावं त्यजत्यंते कलेवरम् ।
तं तमेवैति कौंतेय सदा तद्भावभावितः ॥८-६॥

तस्मात् सर्वेषु कालेषु मां अनुस्मर युध्य च ।
मय्यर्पित मनोबुद्धिः मामेवैष्यस्यसंशयम् ॥८-७॥

अभ्यासयोगयुक्तेन चेतसाऽनान्यगामिना ।
परमं पुरुषं दिव्यं याति पार्थानुचिंतयन् ॥८-८॥

कविं पुराणं अनुशासितारं
अणोरणीयांसमनुस्मरेद्यः ।
सर्वस्य धातारमचिंत्यरूपं
आदित्यवर्णं तमसः परस्तात् ॥८-९॥

प्रयाणकाले मनसाऽचलेन
भक्त्या युक्तो योगबलेन चैव ।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्
स तं परं पुरुषमुपैति दिव्यम् ॥८–१०॥

यदक्षरं वेदविदो वदंति
विशंति यद्यतयो वीतरागाः ।
यदिच्छंतो ब्रह्मचर्यं चरंति
तत्ते पदं संग्रहेण प्रवक्ष्ये ॥८–११॥

सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च ।
मूर्ध्न्याऽधायाऽत्मनः प्राणं आस्थितो योगधारणाम् ॥८–१२॥

ॐ इत्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन् ।
यः प्रयाति त्यजन् देहं स य़ाति परमां गतिम् ॥८–१३॥

अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥८–१४॥

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाऽप्नुवंति महात्मानः संसिद्धिं परमां गताः ॥८–१५॥

आब्रह्मभुवनान् लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौंतेय पुनर्जन्म न विद्यते ॥८–१६॥

सहस्रयुगपर्यंतं अहर्यद् ब्रह्मणो विदुः ।
रात्रिं युगसहस्रांतां तेऽहोरात्रविदो जनाः ॥८–१७॥

अव्यक्ताद् व्यक्तयः सर्वाः प्रभवंत्यहरागमे ।
रात्र्यागमे प्रलीयंते तत्रैवाव्यक्तसंज्ञके ॥८–१८॥

भूतग्रामः स ऐवायं भूत्वा भूत्वा प्रलीयते ।
रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥८–१९॥

परस्तस्मास्तु भावोन्यः व्यक्तोऽव्यक्तात् सनातनः ।
यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥८–२०॥

अव्यक्तोऽक्षर इत्युक्तः तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्तंते तद्धाम परमं मम ॥८–२१॥

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
यस्यांतःस्थानि भूतानि येन सर्वमिदं ततम् ॥८–२२॥

यत्र काले त्वनावृत्तिं आवृत्तिं चैव योगिनः ।
प्रयाता यांति तं कालं वक्ष्यामि भरतर्षभ ॥८–२३॥

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छंति ब्रह्म ब्रह्मविदो जनाः ॥८–२४॥

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चांद्रमसं ज्योतिः योगी प्राप्य निवर्तते ॥८–२५॥

शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ।
ऐकया यात्यनावृत्तिं अन्ययाऽवर्तते पुनः ॥८–२६॥

नैते सृती पार्थ जानन् योगी मुह्यति कश्चन ।
तस्मात् सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥८–२७॥

वेदेषु यज्ञेषु तपस्सु चैव
    दानेषु यत्पुण्यफलं प्रदिष्टम् ।
अत्येति तत्सर्वमिदं विदित्वा
    योगी परं स्थानमुपैति चाऽद्यम् ॥८–२८॥

ॐ तत्सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
अक्षरब्रह्मयोगो नाम अष्टमोध्यायः
॥श्री कृष्णार्पणमस्तु ॥

॥ ॐ श्री परमात्मने नमः ॥
॥ अथ नवमोऽध्यायः ॥ राजविद्याराजगुह्य योगः ॥

श्री भगवानुवाच

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥९-१॥

राजविद्याराजगुह्यं पवित्रमिदमुत्तमम् ।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ॥९-२॥

अश्रद्धधानाः पुरुषाः धर्मस्यास्य परंतप ।
अप्राप्य मां निवर्तंते मृत्युसंसारवर्त्मनि ॥९-३॥

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥९-४॥

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ।
भूतभृन्न च भूतस्थः ममाऽत्मा भूतभावनः ॥९-५॥

यथाऽकाशस्थितो नित्यं वायुः सर्वत्रगो महान् ।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥९-६॥

सर्वभूतानि कौंतेय प्रकृतिं यांति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥९-७॥

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ।
भूतग्राममिमं कृत्स्नं अवशं प्रकृतेर्वशात् ॥९-८॥

न च मां तानि कर्माणि निबध्नंति धनंजय ।
उदासीनवदासीनं असक्तं तेषु कर्मसु ॥९-९॥

मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनाऽनेन कौंतेय जगद् विपरिवर्तते ॥९-१०॥

अवजानंति मां मूढाः मानुषीं तनुमाश्रितम् ।
परं भावमजानंतः मम भूतमहेश्वरम् ॥९-११॥

मोघाशा मोघकर्माणः मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥९-१२॥

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजंत्यनन्यमनसः ज्ञात्वा भूतादिमव्ययम् ॥९-१३॥

सततं कीर्तयंतो मां यतंतश्च दृढव्रताः ।
नमस्यंतश्च मां भक्त्या नित्ययुक्ता उपासते ॥९-१४॥

ज्ञानयज्ञेन चाप्यन्ये यजंतो मामुपासते ।
ऐकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥९-१५॥

अहं क्रतुरहं यज्ञः स्वधाऽहमहमौषधम् ।
मंत्रोऽहं अहमेवाज्यं अहमग्निर् अहं हुतम् ॥९-१६॥

पिताऽहमस्य जगतः माता धाता पितामहः ।
वेद्यं पवित्रमोंकारः ऋक्साम यजुरेव च ॥९-१७॥

गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् ।
प्रभवः प्रळयः स्थानं निधानं बीजमव्ययम् ॥९-१८॥

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥९-१९॥

त्रैविद्या मां सोमपाः पूतपापाः
यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते ।
ते पुण्यमासाद्य सुरेंद्रलोकं
अश्नंति दिव्यान् दिवि देवभोगान् ॥९-२०॥

ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशंति ।
ऐवं त्रयीधर्ममनुप्रपन्नाः
गतागतं कामकामा लभंते ॥९-२१॥

अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥९–२२॥

येऽप्यन्यदेवताभक्ताः यजंते श्रद्धयान्विताः ।
तेऽपि मामेव कौंतेय यजंत्यविधिपूर्वकम् ॥९–२३॥

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।
न तु मामभिजानंति तत्त्वेनातश्च्यवंति ते ॥९–२४॥

यांति देवव्रता देवान् पितृन्यांति पितृव्रताः ।
भूतानि यांति भूतेज्याः यांति मद्याजिनोऽपि माम् ॥९–२५॥

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतं अश्नामि प्रयतात्मनः ॥९–२६॥

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणम् ॥९–२७॥

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबंधनैः ।
संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥९–२८॥

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।
ये भजंति तु मां भक्त्या मयि ते तेषु चाप्यहं ॥९–२९॥

अपि चेत्सुदुराचारः भजते मामनन्यभाक् ।
साधुरेव स मंतव्यः सम्यग्–व्यवसितो हि सः ॥९–३०॥

क्षिप्रं भवति धर्मात्मा शश्वच्छांतिं निगच्छति ।
कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥९–३१॥

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्राः तेऽपि यांति परां गतिम् ।९–३२॥

किं पुनर्ब्राह्मणाः पुण्याः भक्ता राजर्षयस्तथा ।
अनित्यमसुखं लोकं इमं प्राप्य भजस्व माम् ॥९–३३॥

मन्मना भव मद्भक्तः मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैवं आत्मानं मत्परायणः ॥९-३४॥

ॐ तत्सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे राजविद्याराजगुह्ययोगो नाम नवमोध्यायः
॥श्री कृष्णार्पणमस्तु ॥

॥ ॐ श्री परमात्मने नमः ॥
॥ अथ दशमोध्यायः ॥ विभूति योगः ॥

श्री भगवानुवाच
भूय ऐव महाबाहो श्रृणु मे परमं वचः ।
यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥१०–१॥

न मे विदुः सुरगणाः प्रभवं न महर्षयः ।
अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥१०–२॥

यो मां अजमनादिं च वेत्ति लोकमहेश्वरम् ।
असम्मूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥१०–३॥

बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमः शमः ।
सुखं दुःखं भवोऽभावः भयं च अभयमेव च ॥१०–४॥

अहिंसा समता तुष्टिः तपो दानं यशोऽयशः ।
भवंति भावा भूतानां मत्त ऐव पृथग्विधाः ॥१०–५॥

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा ।
मद्भावा मानसा जाताः येषां लोक इमाः प्रजाः ॥१०–६॥

ऐतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः ।
सोऽविकंपेन योगेन युज्यते नात्र संशयः ॥१०–७॥

अहं सर्वस्य प्रभवः मत्तः सर्वं प्रवर्तते ।
इति मत्वा भजंते मां बुधा भावसमन्विताः ॥१०–८॥

मच्चित्ता मद्गतप्राणाः बोधयंतः परस्परम् ।
कथयंतश्च मां नित्यं तुष्यंति च रमंति च ॥१०–९॥

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मां उपयांति ते ॥१०–१०॥

तेषामेवानुकंपार्थं अहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थः ज्ञानदीपेन भास्वता ॥१०–११॥

अर्जुन उवाच
परं ब्रह्म परं धाम पवित्रं परमं भवान् ।
पुरुषं शाश्वतं दिव्यं आदिदेवमजं विभुम् ॥१०-१२॥

आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ।
असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥१०-१३॥

सर्वमेतदृतं मन्ये यन्मां वदसि केशव ।
न हि ते भगवन् व्यक्तिं विदुर्देवा न दानवाः ॥१०-१४॥

स्वयमेवाऽत्मनाऽत्मानं वेत्थ त्वं पुरुषोत्तम ।
भूतभावन भूतेश देवदेव जगत्पते ॥१०-१५॥

वक्तुमर्हस्यशेषेण दिव्या ह्यात्म विभूतयः ।
याभिर्विभूतिभिर्लोकान् इमान् त्वं व्याप्य तिष्ठसि ॥१०-१६॥

कथं विद्यामहं योगिन् त्वां सदा परिचिंतयन् ।
केषु केषु च भावेषु चिंत्योसि भगवन्मया ॥१०-१७॥

विस्तरेणाऽत्मनो योगं विभूतिं च जनार्दन ।
भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम् ॥१०-१८॥

श्री भगवानुवाच
हंत ते कथयिष्यामि दिव्या ह्यात्म विभूतयः ।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यंतो विस्तरस्य मे ॥१०-१९॥

अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।
अहमादिश्च मध्यंच भूतानां अंत ऐव च ॥१०-२०॥

आदित्यानां अहं विष्णुः ज्योतिषां रविरंशुमान् ।
मरीचिर् मरुतां अस्मि नक्षत्राणां अहं शशी ॥१०-२१॥

वेदानां सामवेदोस्मि देवानां अस्मि वासवः ।
इंद्रियाणां मनश्चास्मि भूतानां अस्मि चेतना ॥१०-२२॥

रुद्राणां शंकरश्चास्मि वित्तेशो यक्षरक्षसाम् ।
वसूनां पावकश्चास्मि मेरुः शिखरिणां अहम् ॥१०-२३॥

पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम् ।
सेनानीनां अहं स्कंदः सरसां अस्मि सागरः ॥१०-२४॥

महर्षीणां भृगुरहं गिरामस्मि ऐकमक्षरम् ।
यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः ॥१०-२५॥

अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः ।
गंधर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥१०-२६॥

उच्चैःश्रवसं अश्वानां विद्धि मां अमृतोद्भवम् ।
ऐरावतं गजेंद्राणां नराणां च नराधिपम् ॥१०-२७॥

आयुधानां अहं वज्रं धेनूनां अस्मि कामधुक् ।
प्रजनश्चास्मि कंदर्पः सर्पाणां अस्मि वासुकिः ॥१०-२८॥

अनंतश्चास्मि नागानाम् वरुणो यादसाम् अहम् ।
पितृणां अर्यमा चास्मि यमः संयमतामहम् ॥१०-२९॥

प्रह्लादश्चास्मि दैत्यानां कालः कलयतां अहं ।
मृगाणां च मृगेंद्रोऽहं वैनतेयश्च पक्षिणाम् ॥१०-३०॥

पवनः पवतां अस्मि रामः शस्त्रभृतां अहम् ।
झषाणां मकरश्चास्मि स्रोतसां अस्मि जाह्नवी ॥१०-३१॥

सर्गाणां आदिरंतश्च मध्यं चैव अहमर्जुन ।
अध्यात्मविद्या विद्यानां वादः प्रवदतां अहम् ॥१०-३२॥

अक्षराणां अकारोऽस्मि द्वंद्वः सामासिकस्य च ।
अहमेवाक्षयः कालः धाताऽहं विश्वतोमुखः ॥१०-३३॥

मृत्युः सर्वहरश्चाहं उद्भवश्च भविष्यताम् ।
कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ॥१०-३४॥

बृहत्साम तथा साम्नां गायत्री छंदसां अहम् ।
मासानां मार्गशीर्षोऽहं ऋतूनां कुसुमाकरः ॥१०-३५॥

द्यूतं छलयतां अस्मि तेजस् तेजस्विनां अहम् ।
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतां अहम् ॥१०-३६॥

वृष्णीनां वासुदेवोऽस्मि पांडवानां धनंजयः ।
मुनीनां अप्यहं व्यासः कवीनां उशना कविः ॥१०-३७॥

दंडो दमयतां अस्मि नीतिरस्मि जिगीषतां ।
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥१०-३८॥

यच्चापि सर्वभूतानां बीजं तदहमर्जुन ।
न तदस्ति विना यत् स्यात् मया भूतं चराचरम् ॥१०-३९॥

नांतोऽस्ति मम दिव्यानां विभूतीनां परंतप ।
ऐष तूद्देशतः प्रोक्तः विभूतेर्विस्तरो मया ॥१०-४०॥

यद्यद् विभूतिमत् सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छत्वं मम तेजोऽंशसंभवम् ॥१०-४१॥

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्नं ऐकांशेन स्थितो जगत् ॥१०-४२॥

ॐ तत्सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
विभूतियोगो नाम दशमोध्यायः
॥श्री कृष्णार्पणमस्तु ॥

॥ ॐ श्री परमात्मने नमः ॥
॥ अथ ऐकादशोध्यायः ॥ विश्वरूपदर्शन योगः ॥

अर्जुन उवाच

मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितम् ।
यत् त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम ॥११-१॥

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया ।
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ॥११-२॥

ऐवमेतद्यथाऽत्थ त्वं आत्मानं परमेश्वर ।
द्रष्टुमिच्छामि ते रूपं ऐश्वरं पुरुषोत्तम ॥११-३॥

मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो ।
योगेश्वर ततो मे त्वं दर्शयाऽत्मानमव्ययम् ॥११-४॥

श्री भगवानुवाच
पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः ।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥११-५॥

पश्याऽदित्यान् वसून् रुद्रान् अश्विनौ मरुतस्तथा ।
बहून्यदृष्टपूर्वाणि पश्याऽश्चर्याणि भारत ॥११-६॥

इहैकस्थं जगत् कृत्स्नं पश्याद्य सचराचरम् ।
मम देहे गुडाकेश यच्चान्यद् द्रष्टुमिच्छसि ॥११-७॥

न तु मां शक्यसे द्रष्टुं अनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥११-८॥

संजय उवाच
ऐवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः ।
दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥११-९॥

अनेकवक्त्रनयनं अनेकाद्भुतदर्शनम् ।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥११-१०॥

दिव्यमाल्यांबरधरं दिव्यगंधानुलेपनम् ।
सर्वाश्चर्यमयं देवं अनंतं विश्वतोमुखम् ॥११–११॥

दिवि सूर्य सहस्रस्य भवेद्युगपदुत्थिता ।
यदि भाः सदृशी सा स्यात् भासस्तस्य महात्मनः ॥११–१२॥

तत्रैकस्थं जगत् कृत्स्नं प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य शरीरे पांडवस्तदा ॥११–१३॥

ततः स विस्मयाविष्टः हृष्टरोमा धनंजयः ।
प्रणम्य शिरसा देवं कृतांजलिरभाषत ॥११–१४॥

अर्जुन उवाच

पश्यामि देवान् तव देव देहे
सर्वान् तथा भूतविशेषसंघान् ।
ब्रह्माणमीशं कमलासनस्थं
ऋषींश्च सर्वान् उरगांश्च दिव्यान् ॥११–१५॥

अनेकबाहूदरवक्त्रनेत्रं
पश्यामि त्वां सर्वतोऽनंतरूपम् ।
नांतं न मध्यं न पुनस्तवाऽदिं
पश्यामि विश्वेश्वर विश्वरूप ॥११–१६॥

किरीटिनं गदिनं चक्रिणं च
तेजोराशिं सर्वतो दीप्तिमंतम् ।
पश्यामि त्वां दुर्निरीक्ष्यं समंतात्
दीप्तानलार्कद्युतिमप्रमेयम् ॥११–१७॥

त्वमक्षरं परमं वेदितव्यं
त्वमस्य विश्वस्य परं निधानम् ।
त्वमव्ययः शाश्वतधर्मगोप्ता
सनातनस्त्वं पुरुषो मतो मे ॥११–१८॥

अनादि मध्यांतमनंतवीर्यं
    अनंतबाहुं शशिसूर्यनेत्रम् ।
पश्यामि त्वां दीप्तहुताशवक्त्रं
    स्वतेजसा विश्वमिदं तपंतम् ॥११–१९॥

द्यावा पृथिव्योरिदमंतरं हि
    व्याप्तं त्वयैकेन दिशश्च सर्वाः ।
दृष्ट्वाऽद्भुतं रूपमुग्रं तवेदं
    लोकत्रयं प्रव्यथितं महात्मन् ॥११–२०॥

अमी हि त्वां सुरसंघा विशंति
    केचिद् भीताः प्रांजलयो गृणंति ।
स्वस्तीति उक्त्वा महर्षि सिद्धसंघाः
    स्तुवंति त्वां स्तुतिभिः पुष्कलाभिः ॥११–२१॥

रुद्रादित्या वसवो ये च साध्याः
    विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ।
गंधर्व यक्षासुर सिद्धसंघाः
    वीक्षंते त्वां विस्मिताश्चैव सर्वे ॥११–२२॥

रूपं महत्ते बहुवक्त्रनेत्रं
    महाबाहो बहुबाहूरुपादम् ।
बहूदरं बहुदंष्ट्राकरालं
    दृष्ट्वा लोकाः प्रव्यथितास्तथाऽहम् ॥११–२३॥

नभः स्पृशं दीप्तमनेकवर्णं
    व्यात्ताननं दीप्तविशालनेत्रम् ।
दृष्ट्वा हि त्वां प्रव्यथितांतरात्मा
    धृतिं न विंदामि शमं च विष्णो ॥११–२४॥

दंष्ट्राकरालानि च ते मुखानि
    दृष्ट्वैव कालानलसन्निभानि ।
दिशो न जाने न लभे च शर्म
    प्रसीद देवेश जगन्निवास ॥११–२५॥

अमी च त्वां धृतराष्ट्रस्य पुत्राः
सर्वे सहैवावनिपालसंघैः ।
भीष्मो द्रोणः सूतपुत्रस्तथाऽसौ
सहास्मदीयैरपि योधमुख्यैः ॥११-२६॥

वक्त्राणि ते त्वरमाणा विशंति
दंष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनांतरेषु
संदृश्यंते चूर्णितैरुत्तमांगैः ॥११-२७॥

यथा नदीनां बहवोऽंबुवेगाः
समुद्रमेवाभिमुखा द्रवंति ।
तथा तवामी नरलोकवीराः
विशंति वक्त्राण्यभिविज्वलंति ॥११-२८॥

यथा प्रदीप्तं ज्वलनं पतंगाः
विशंति नाशाय समृद्धवेगाः ।
तथैव नाशाय विशंति लोकाः
तवापि वक्त्राणि समृद्धवेगाः ॥११-२९॥

लेलिह्यसे ग्रसमानः समंतात्
लोकान् समग्रान् वदनैर् ज्वलद्भिः ।
तेजोभिरापूर्य जगत्समग्रं
भासस्तवोग्राः प्रतपंति विष्णो ॥११-३०॥

आख्याहि मे को भवानुग्ररूपः
नमोऽस्तु ते देववर प्रसीद ।
विज्ञातुमिच्छामि भवंतमाद्यं
न हि प्रजानामि तव प्रवृत्तिम् ॥११-३१॥

श्री भगवानुवाच

कालोऽस्मि लोकक्षयकृत् प्रवृद्धः
लोकान् समाहर्तुं इह प्रवृत्तः ।
ऋतेऽपि त्वां न भविष्यंति सर्वे
येऽवस्थिताः प्रत्यनीकेषु योधाः ॥११-३२॥

तस्मात् त्वं उत्तिष्ठ यशो लभस्व
जित्वा शत्रून् भुंक्ष्व राज्यं समृद्धम् ।
मयैवैते निहता: पूर्वमेव
निमित्तमात्रं भव सव्यसाचिन् ॥११-३३॥

द्रोणं च भीष्मं च जयद्रथं च
कर्णं तथाऽन्यानपि योधवीरान् ।
मया हतान्  त्वं जहि मा व्यथिष्ठा:
युध्यस्व जेतासि रणे सपत्नान् ॥११-३४॥

संजय उवाच
ऐतत् श्रुत्वा वचनं केशवस्य
कृतांजलिर्वेपमान: किरीटी ।
नमस्कृत्वा भूय ऐवाऽह कृष्णं
सगद्गदं भीतभीत: प्रणम्य ॥११-३५॥

अर्जुन उवाच
स्थाने हृषीकेश तव प्रकीर्त्या
जगत् प्रहृष्यत्यनुरज्यते च ।
रक्षांसि भीतानि दिशो द्रवंति
सर्वे नमस्यंति च सिद्धसंघा: ॥११-३६॥

कस्माच्च ते न नमेरन् महात्मन्
गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ।
अनंत देवेश जगन्निवास
त्वमक्षरं सदसत् तत्परं यत् ॥११-३७॥

त्वमादिदेव: पुरुष: पुराण:
त्वमस्य विश्वस्य परं निधानम् ।
वेत्तासि वेद्यं च परं च धाम
त्वया ततं विश्वमनंतरूप ॥११-३८॥

वायुर्-यमोऽग्निर्-वरुण: शशांक:
प्रजापतिस्त्वं प्रपितामहश्च ।
नमो नमस्तेऽस्तु सहस्रकृत्व:
पुनश्च भूयोऽपि नमो नमस्ते ॥११-३९॥

नमः पुरस्तादथ पृष्ठतस्ते
 नमोऽस्तु ते सर्वत एव सर्व ।
अनंतवीर्यामितविक्रमस्त्वं
 सर्वं समाप्नोषि ततोऽसि सर्वः ॥११–४०॥

सखेति मत्वा प्रसभं यदुक्तं
 हे कृष्ण हे यादव हे सखेति ।
अजानता महिमानं तवेदं
 मया प्रमादात् प्रणयेन वाऽपि ॥११–४१॥

यच्चापहासार्थम् असत्कृतोऽसि
 विहारशय्यासन भोजनेषु ।
एकोऽथवाप्यच्युत तत् समक्षं
 तत् क्षामये त्वां अहमप्रमेयम् ॥११–४२॥

पिताऽसि लोकस्य चराचरस्य
 त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत् समोऽस्त्यभ्यधिकः कुतोऽन्यः
 लोकत्रयेऽप्यप्रतिमप्रभाव ॥११–४३॥

तस्मात् प्रणम्य प्रणिधाय कायं
 प्रसादये त्वां अहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्युः
 प्रियः प्रियायार्हसि देव सोढुम् ॥११–४४॥

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा
 भयेन च प्रव्यथितं मनो मे ।
तदेव मे दर्शय देव रूपं
 प्रसीद देवेश जगन्निवास ॥११–४५॥

किरीटिनं गदिनं चक्रहस्तं
 इच्छामि त्वां द्रष्टुमहं तथैव ।
तेनैव रूपेण चतुर्भुजेन
 सहस्रबाहो भव विश्वमूर्ते ॥११–४६॥

श्री भगवानुवाच

मया प्रसन्नेन तवार्जुनेदं
रूपं परं दर्शितमात्मयोगात् ।
तेजोमयं विश्वमनंतमाद्यं
यन्मे त्वदन्येन न दृष्टपूर्वम् ॥११–४७॥

न वेद यज्ञाध्ययनैर्न दानैः
न च क्रियाभिर्न तपोभिरुग्रैः ।
ऐवं रूपः शक्य अहं नृलोके
द्रष्टुं त्वदन्येन कुरुप्रवीर ॥११–४८॥

मा ते व्यथा मा च विमूढभावः
दृष्ट्वा रूपं घोरमीदृङ्ममेदम् ।
व्यपेतभीः प्रीतमनाः पुनस्त्वं
तदेव मे रूपमिदं प्रपश्य ॥११–४९॥

संजय उवाच

इत्यर्जुनं वासुदेवस्तथोक्त्वा
स्वकं रूपं दर्शयामास भूयः
आश्वासयामास च भीतमेनं
भूत्वा पुनः सौम्यवपुर्महात्मा ॥११–५०॥

अर्जुन उवाच

दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ।
इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ॥११–५१॥

श्री भगवानुवाच

सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम ।
देवा अप्यस्य रूपस्य नित्यं दर्शनकांक्षिणः ॥११–५२॥

नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
शक्य ऐवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥११–५३॥

भक्त्या त्वनन्यया शक्यः अहमेवं विधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च  परंतप ॥११-५४॥

मत्कर्मकृन्मत्परमः मद्भक्तः संगवर्जितः ।
निर्वैरः सर्वभूतेषु यः स मामेति पांडव ॥११-५५॥

ॐ तत्सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विश्वरूपदर्शनयोगो नाम ऐकादशोध्याय:
॥श्री कृष्णार्पणमस्तु ॥

॥ ॐ श्री परमात्मने नमः ॥
॥ अथ द्वादशोध्यायः ॥ भक्ति योगः ॥

अर्जुन उवाच
एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥१२-१॥

श्री भगवानुवाच
मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेताः ते मे युक्ततमा मताः ॥१२-२॥

ये त्वक्षरमनिर्देश्यं अव्यक्तं पर्युपासते ।
सर्वत्रगमचिंत्यं च कूटस्थमचलं ध्रुवम् ॥१२-३॥

सन्नियम्येंद्रियग्रामं सर्वत्र समबुद्धयः ।
ते प्राप्नुवंति मामेव सर्वभूतहिते रताः ॥१२-४॥

क्लेशोऽधिकतरस्तेषां अव्यक्तासक्तचेतसाम् ।
अव्यक्ताहि गतिर्दुःखं देहवद्भिरवाप्यते ॥१२-५॥

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायंत उपासते ॥१२-६॥

तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि नचिरात् पार्थ मय्यावेशितचेतसाम् ॥१२-७॥

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥१२-८॥

अथ चित्तं समाधातुं न शक्नोसि मयि स्थिरम् ।
अभ्यासयोगेन ततः मामिच्छाऽप्तुं धनंजय ॥१२-९॥

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि ॥१२-१०॥

अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥१२-११॥

श्रेयो हि ज्ञानमभ्यासात् ज्ञानात् ध्यानं विशिष्यते ।
ध्यानात् कर्मफलत्यागः त्यागात् शांतिरनंतरम् ॥१२–१२॥

अद्वेष्टा सर्वभूतानां मैत्रः करुण ऐव च ।
निर्ममो निरहंकारः समदुःखसुखः क्षमी ॥१२–१३॥

संतुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिः यो मद्भक्तः स मे प्रियः ॥१२–१४॥

यस्मान्नोद्विजते लोकः लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैः मुक्तो यः स च मे प्रियः ॥१२–१५॥

अनपेक्षः शुचिर्दक्षः उदासीनो गतव्यथः ।
सर्वारंभपरित्यागी यो मद्भक्तः स मे प्रियः ॥१२–१६॥

यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति ।
शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः ॥१२–१७॥

समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समः संगविवर्जितः ॥१२–१८॥

तुल्यनिंदास्तुतिर्मौनी संतुष्टो येन केनचित् ।
अनिकेतः स्थिरमतिः भक्तिमान् मे प्रियो नरः ॥१२–१९॥

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्धधाना मत्परमाः भक्तास्तेऽतीव मे प्रियाः ॥१२–२०॥

ॐ तत्सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे भक्तियोगो नाम द्वादशोध्यायः
॥श्री कृष्णार्पणमस्तु ॥

॥ ॐ श्री परमात्मने नमः ॥
॥ अथ त्रयोदशोध्यायः ॥ क्षेत्रक्षेत्रज्ञविभाग योगः ॥

अर्जुन उवाच

प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च।
ऐतद् वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव ॥१३–१॥

श्री भगवानुवाच

इदं शरीरं कौंतेय क्षेत्रमित्यभिधीयते ।
ऐतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥१३–२॥

क्षेत्रज्ञम् चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानम् यत्तत् ज्ञानं मतं मम ॥१३–३॥

तत् क्षेत्रं यच्च यादृक्क यद्विकारि यतश्च यत् ।
स च यो यत् प्रभावश्च तत् समासेन मे शृणु ॥१३–४॥

ऋषिभिर्बहुधा गीतं छंदोभिर्विविधैः पृथक् ।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥१३–५॥

महाभूतान्यहंकारः बुद्धिरव्यक्तमेव च ।
इंद्रियाणि दशैकं च पंच चेंद्रियगोचराः ॥१३–६॥

इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः ।
ऐतत् क्षेत्रं समासेन सविकारं उदाहृतम् ॥१३–७॥

अमानित्वं अदंभित्वं अहिंसा क्षांतिरार्जवम् ।
अचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥१३–८॥

इंद्रियार्थेषु वैराग्यं अनंहकार ऐव च ।
जन्ममृत्युजराव्याधि दुःखदोषानुदर्शनम् ॥१३–९॥

असक्तिरनभिष्वंगः पुत्रदारगृहादिषु ।
नित्यं च समचित्तत्वं इष्टानिष्टोपपत्तिषु ॥१३–१०॥

मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वं अरतिर्जनसंसदि ॥१३-११॥

अध्यात्मज्ञान नित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।
ऐतज्ज्ञानमिति प्रोक्तं अज्ञानं यदतोऽन्यथा ॥१३-१२॥

ज्ञेयं यत्तत् प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते ।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥१३-१३॥

सर्वतः पाणिपादं तत् सर्वतोऽक्षि शिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥१३-१४॥

सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितम् ।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥१३-१५॥

बहिरंतश्च भूतानां अचरं चरमेव च ।
सूक्ष्मत्वात् तदविज्ञेयं दूरस्थं चांतिके च तत् ॥१३-१६॥

अविभक्तं च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्तृ च तत् ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥१३-१७॥

ज्योतिषामपि तत् ज्योतिः तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥१३-१८॥

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ।
मद्भक्त ऐतद्विज्ञाय मद् भावायोपपद्यते ॥१३-१९॥

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् ॥१३-२०॥

कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥१३-२१॥

पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान् गुणान् ।
कारणं गुणसंगोऽस्य सदसद् योनिजन्मसु ॥१३-२२॥

उपद्रष्टाऽनुमंता च भर्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तः देहेऽस्मिन् पुरुषः परः ॥१३-२३॥

य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह ।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते ॥१३-२४॥

ध्यानेनाऽत्मनि पश्यंति केचिदात्मानमात्मना ।
अन्ये सांख्येन योगेन कर्मयोगेन चापरे ॥१३-२५॥

अन्ये त्वेवमजानंतः श्रुत्वाऽन्येभ्य उपासते ।
तेऽपि चातितरंत्येव मृत्युं श्रुतिपरायणाः ॥१३-२६॥

यावत् संजायते किंचित् सत्त्वं स्थावरजंगमम् ।
क्षेत्र क्षेत्रज्ञसंयोगात् तद्विद्धि भरतर्षभ ॥१३-२७॥

समं सर्वेषु भूतेषु तिष्ठंतं परमेश्वरम् ।
विनश्यत्स्वविनश्यंतं यः पश्यति स पश्यति ॥१३-२८॥

समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम् ।
न हिनस्त्यात्मनाऽऽत्मानं ततो याति परां गतिम् ॥१३-२९॥

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ।
यः पश्यति तथाऽऽत्मानं अकर्तारं स पश्यति ॥१३-३०॥

यदा भूतपृथग्भावं एकस्थमनुपश्यति ।
तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥१३-३१॥

अनादित्वात् निर्गुणत्वात् परमात्मा अयमव्ययः ।
शरीरस्थोऽपि कौंतेय न करोति न लिप्यते ॥१३-३२॥

यथा सर्वगतं सौक्ष्म्यात् आकाशं नोपलिप्यते ।
सर्वत्रावस्थितो देहे तथाऽत्मा नोपलिप्यते ॥१३-३३॥

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥१३-३४॥

क्षेत्रक्षेत्रज्ञयोरेवं अंतरं ज्ञानचक्षुषा ।
भूतप्रकृतिमोक्षं च ये विदुर्यांति ते परम् ॥१३–३५॥

ॐ तत्सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे क्षेत्रक्षेत्रज्ञविभागयोगो नाम त्रयोदशोध्याय:
॥श्री कृष्णार्पणमस्तु ॥

॥ ॐ श्री परमात्मने नमः ॥
॥ अथ चतुर्दशोऽध्यायः ॥ गुणत्रयविभाग योगः ॥

श्रीभगवान् उवाच
परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ।
यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ॥१४-१॥

इदं ज्ञानं उपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायंते प्रळये न व्यथंति च ॥१४-२॥

मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहम् ।
संभवः सर्वभूतानां ततो भवति भारत ॥१४-३॥

सर्वयोनिषु कौंतेय मूर्तयः संभवंति याः ।
तासां ब्रह्म महद्योनिः अहं बीजप्रदः पिता ॥१४-४॥

सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः ।
निबध्नंति महाबाहो देहे देहिनमव्ययम् ॥१४-५॥

तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम् ।
सुखसंगेन बध्नाति ज्ञानसंगेन चानघ ॥१४-६॥

रजो रागात्मकं विद्धि तृष्णासंगसमुध्भवम् ।
तन्निबध्नाति कौंतेय कर्मसंगेन देहिनम् ॥१४-७॥

तमस्तु अज्ञानजं विद्धि मोहनं सर्वदेहिनां ।
प्रमादालस्य निद्राभिः तन्निबध्नाति भारत ॥१४-८॥

सत्त्वं सुखे संजयति रजः कर्मणि भारत ।
ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत ॥१४-९॥

रजस्तमश्चाभिभूय सत्त्वं भवति भारत ।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥१४-१०॥

सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते ।
ज्ञानं यदा तदा विद्यात् विवृद्धं सत्त्वमित्युत ॥१४-११॥

लोभः प्रवृत्तिरारंभः कर्मणामशमः स्पृहा ।
रजस्येतानि जायंते विवृद्धे भरतर्षभ ॥१४-१२॥

अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह ऐव च ।
तमस्येतानि जायंते विवृद्धे कुरुनंदन ॥१४-१३॥

यदा सत्त्वे प्रवृद्धे तु प्रळयं याति देहभृत् ।
तदोत्तमविदां लोकान् अमलान् प्रतिपद्यते ॥१४-१४॥

रजसि प्रळयं गत्वा कर्मसंगिषु जायते ।
तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥१४-१५॥

कर्मणः सुकृतस्याऽहुः सात्त्विकं निर्मलं फलम् ।
रजसस्तु फलं दुःखं अज्ञानं तमसः फलम् ॥४-१६॥

सत्त्वात् संजायते ज्ञानं रजसो लोभ ऐव च ।
प्रमादमोहौ तमसः भवतोऽज्ञानमेव च ॥१४-१७॥

ऊर्ध्वं गच्छंति सत्त्वस्थाः मध्ये तिष्ठंति राजसाः ।
जघन्यगुणवृत्तिस्थाः अधो गच्छंति तामसाः ॥१४-१८॥

नान्यं गुणेभ्यः कर्तारं यदा द्रष्टाऽनुपश्यति ।
गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥१४-१९॥

गुणान् ऐतान् अतीत्य त्रीन् देही देहसमुद्भवान् ।
जन्ममृत्युजरादुःखैः विमुक्तोऽमृतमश्नुते ॥१४-२०॥

अर्जुन उवाच
कैर्लिंगैस्त्रीन् गुणान् ऐतान् अतीतो भवति प्रभो ।
किमाचारः कथं चैतान् त्रीन् गुणान् अतिवर्तते ॥१४-२१॥

श्री भगवानुवाच
प्रकाशं च प्रवृत्तिं च मोहमेव च पांडव ।
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति ॥१४-२२॥

उदासीनवदासीनः गुणैर्योन विचाल्यते ।
गुणा वर्तंत इत्येव योऽवतिष्ठति नेंगते ॥१४-२३॥

समदु:खसुखः स्वस्थः समलोष्टाश्मकांचनः ।
तुल्यप्रिया प्रियो धीरः तुल्यनिंदात्मसंस्तुतिः ॥१४-२४॥

मानापमानयोस्तुल्यः तुल्यो मित्रारिपक्षयोः ।
सर्वारंभपरित्यागी गुणातीतः स उच्यते ॥१४-२५॥

मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥१४-२६॥

ब्रह्मणो हि प्रतिष्ठाऽहं अमृतस्याव्ययस्य च ।
शाश्वतस्य च धर्मस्य सुखस्यैकांतिकस्य च ॥१४-२७॥

ॐ तत्सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः
॥श्री कृष्णार्पणमस्तु ॥

॥ ॐ श्री परमात्मने नमः ॥
॥ अथ पंचदशोऽध्यायः ॥ पुरुषोत्तम योगः ॥

श्रीभगवान् उवाच
ऊर्ध्वमूलं अधःशाखं अश्वत्थं प्राहुरव्ययम् ।
छंदांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥१५–१॥

अधश्चोर्ध्वं प्रसृतातस्य शाखाः
गुणप्रवृद्धा विषयप्रवालाः ।
अधश्च मूलान्यनुसंततानि
कर्मानुबंधीनि मनुष्यलोके ॥१५–२॥

न रूपमस्येह तथोपलभ्यते
नांतो न चाऽदिर्न च संप्रतिष्ठा ।
अश्वत्थमेनं सुविरूढमूलं
असंगशस्त्रेण दृढेन छित्त्वा ॥१५–३॥

ततः पदं तत्परिमार्गितव्यं
यस्मिन् गता न निवर्तंति भूयः ।
तमेव चाद्यं पुरुषं प्रपद्ये
यतः प्रवृत्तिः प्रसृता पुराणी ॥१५–४॥

निर्मानमोहा जितसंगदोषाः
अध्यात्मनित्या विनिवृत्तकामाः ।
द्वंद्वैर्विमुक्ताः सुखदुःखसंज्ञैः
गच्छंत्यमूढाः पदमव्ययं तत् ॥१५–५॥

न तद्भासयते सूर्यः न शशांको न पावकः ।
यद्गत्वा न निवर्तंते तद्धाम परमं मम ॥१५–६॥

ममैवांशो जीवलोके जीवभूतः सनातनः ।
मनःषष्ठानींद्रियाणि प्रकृतिस्थानि कर्षति ॥१५–७॥

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गंधानिवाशयात् ॥१५–८॥

श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चायं विषयानुपसेवते ॥१५-९॥

उत्क्रामंतं स्थितम् वाऽपि भुंजानं वा गुणान्वितम् ।
विमूढा नानुपश्यंति पश्यंति ज्ञानचक्षुषः ॥१५-१०॥

यतंतो योगिनश्चैनं पश्यंत्यात्मन्यवस्थितम् ।
यतंतोऽप्यकृतात्मानः नैनं पश्यंत्यचेतसः ॥१५-११॥

यदादित्यगतं तेजः जगद्भासयतेऽखिलम् ।
यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥१५-१२॥

गामाविश्य च भूतानि धारयाम्यहमोजसा ।
पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥१५-१३॥

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥१५-१४॥

सर्वस्य चाहं हृदि सन्निविष्टः
मत्तः स्मृतिर्ज्ञानमपोहनं च ।
वेदैश्च सर्वैरहमेव वेद्यः
वेदांतकृद्वेदविदेव चाहम् ॥१५-१५॥

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर ऐव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥१५-१६॥

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥१५-१७॥

यस्मात् क्षरमतीतोऽहं अक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥१५-१८॥

यो मामेवमसम्मूढः जानाति पुरुषोत्तमम् ।
स सर्वविद् भजति मां सर्वभावेन भारत ॥१५-१९॥

इति गुह्यतमं शास्त्रं इदमुक्तं मयाऽनघ ।
ऐतत् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत ॥१५-२०॥

ॐ तत्सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोगो नाम पंचदशोध्याय:
॥श्री कृष्णार्पणमस्तु ॥

॥ ॐ श्री परमात्मने नमः ॥
॥ अथ षोडशोध्यायः ॥ दैवासुरसंपद्विभाग योगः ॥

श्रीभगवान् उवाच
अभयं सत्त्वसंशुद्धिः ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥१६-१॥

अहिंसा सत्यमक्रोधः त्यागः शांतिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥१६-२॥

तेजः क्षमा धृतिः शौचं अद्रोहो नातिमानिता ।
भवंति संपदं दैवीं अभिजातस्य भारत ॥१६-३॥

दंभो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम् ॥१६-४॥

दैवी संपद्विमोक्षाय निबंधायाऽसुरी मता ।
मा शुचः संपदं दैवीं अभिजातोऽसि पांडव ॥१६-५॥

द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर ऐव च ।
दैवो विस्तरशः प्रोक्तः आसुरं पार्थ मे शृणु ॥१६-६॥

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ।
न शौचं नापि चाऽचारः न सत्यं तेषु विद्यते ॥१६-७॥

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
अपरस्परसंभूतं किमन्यत् कामहेतुकम् ॥१६-८॥

ऐतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।
प्रभवंत्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥१६-९॥

काममाश्रित्य दुष्पूरं दंभमानमदान्विताः ।
मोहाद् गृहीत्वा सद् ग्राहान् प्रवर्तंतेऽशुचिव्रताः ॥१६-१०॥

चिंतामपरिमेयां च प्रळयांतामुपाश्रिताः ।
कामोपभोगपरमाः ऐतावदिति निश्चिताः ॥१६-११॥

आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।
ईहंते कामभोगार्थं अन्यायेनार्थसंचयान् ॥१६-१२॥

इदमद्य मया लब्धं इमं प्राप्स्ये  मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥१६-१३॥

असौ मया हतः शत्रुः हनिष्ये चापरानपि ।
ईश्वरोऽहं अहं भोगी सिद्धोऽहं बलवान् सुखी ॥१६-१४॥

आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्ये इत्यज्ञानविमोहिताः ॥१६-१५॥

अनेकचित्तविभ्रांताः मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतंति नरकेऽशुचौ ॥१६-१६॥

आत्मसंभाविताः स्तब्धाः धनमानमदान्विताः ।
यजंते नामयज्ञैस्ते दंभेनाविधिपूर्वकम् ॥१६-१७॥

अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषंतोऽभ्यसूयकाः ॥१६-१८॥

तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभान् आसुरीष्वेव योनिषु ॥१६-१९॥

आसुरीं योनिमापन्नाः मूढा जन्मनिजन्मनि ।
मां अप्राप्यैव कौंतेय ततो यांति अधमाम् गतिम् ॥१६-२०॥

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभः तस्मादेतत् त्रयं त्यजेत् ॥१६-२१॥

एतैर्विमुक्तः कौंतेय तमोद्वारैस्त्रिभिर्नरः ।
आचरत्यात्मनः श्रेयः ततो याति परां गतिम् ॥१६-२२॥

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥१६-२३॥

तस्मात् शास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥१६-२४॥

ॐ तत्सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे दैवासुरसंपद्विभागयोगो नाम षोडशोध्याय:
॥श्री कृष्णार्पणमस्तु ॥

॥ ॐ श्री परमात्मने नमः ॥
॥ अथ सप्तदशोऽध्यायः ॥ श्रद्धात्रयविभाग योगः ॥

अर्जुन उवाच
ये शास्त्रविधिमुत्सृज्य यजंते श्रद्धयाऽन्विताः ।
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ॥१७-१॥

श्रीभगवानुवाच
त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्विकी राजसी चैव तामसी चेति तां शृणु ॥१७-२॥

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत ।
श्रद्धामयोऽयं पुरुषः यो यच्छ्रद्धः स ऐव सः ॥१७-३॥

यजंते सात्विका देवान् यक्षरक्षांसि राजसाः ।
प्रेतान् भूतगणांश्चान्ये यजंते तामसाः जनाः ॥१७-४॥

अशास्त्रविहितं घोरं तप्यंते ये तपो जनाः ।
दंभाहंकारसंयुक्ताः कामरागबलान्विताः ॥१७-५॥

कर्शयंतः शरीरस्थं भूतग्राममचेतसः ।
मां चैवांतः शरीरस्थं तान् विद्ध्यासुरनिश्चयान् ॥१७-६॥

अहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥१७-७॥

आयुःसत्त्वबलारोग्य सुखप्रीतिविवर्धनाः ।
रस्याः स्निग्धाः स्थिराः हृद्याः आहाराः सात्त्विकप्रियाः ॥१७-८॥

कट्वम्ल लवणात्युष्ण तीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टाः दुःखशोकामयप्रदाः ॥१७-९॥

यातयामं गतरसं पूति पर्युषितं च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥१७-१०॥

अफलाकांक्षिभिर्यज्ञः विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥१७-११॥

अभिसंधाय तु फलं दंभार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥१७-१२॥

विधिहीनमसृष्टान्नं मंत्रहीनं अदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥१७-१३॥

देवद्विजगुरुप्राज्ञ पूजनं शौचमार्जवम् ।
ब्रह्मचर्यं अहिंसा च शारीरं तप उच्यते ॥ १७-१४॥

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥१७-१५॥

मनः प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत् तपो मानसमुच्यते ॥१७-१६॥

श्रद्धया परया तप्तं तपस्तत् त्रिविधं नरैः ।
अफलाकांक्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥१७-१७॥

सत्कारमानपूजार्थं तपो दंभेन चैव यत् ।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥१७-१८॥

मूढग्राहेणाऽत्मनो यत् पीडया क्रियते तपः ।
परस्योत्सादनार्थं वा तत् तामसमुदाहृतम् ॥१७-१९॥

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥१७-२०॥

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ॥१७-२१॥

अदेशकाले यद्दानं अपात्रेभ्यश्च दीयते ।
असत्कृतं अवज्ञातं तत् तामसमुदाहृतम् ॥१७-२२॥

ॐ तत्सदिति निर्देशः ब्रह्मणस्त्रिविधः स्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥१७–२३॥

तस्माद् ॐ इत्युदाहृत्य यज्ञदानतपःक्रियाः ।
प्रवर्तंते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥१७–२४॥

तदित्यनभिसंधाय फलं यज्ञतपःक्रियाः ।
दानक्रियाश्च विविधाः क्रियंते मोक्षकांक्षिभिः ॥१७–२५॥

सद्भावे साधुभावे च सदित्येतत् प्रयुज्यते ।
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥१७–२६॥

यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते ।
कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥१७–२७॥

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
असदित्युच्यते पार्थ न च तत् प्रेत्य नो इह ॥१७–२८॥

ॐ तत्सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे श्रद्धात्रयविभागयोगो नाम सप्तदशोध्यायः
॥श्री कृष्णार्पणमस्तु ॥

॥ ॐ श्री परमात्मने नमः ॥
॥ अथ अष्टादशोऽध्यायः ॥ मोक्षसंन्यास योगः ॥

अर्जुन उवाच
संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम् ।
त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥१८–१॥

श्रीभगवानुवाच
काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः ।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥१८–२॥

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ।
यज्ञदानतपः कर्म न त्याज्यमिति चापरे ॥१८–३॥

निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ।
त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः ॥१८–४॥

यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥१८–५॥

ऐतान्यपि तु कर्माणि संगं त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥१८–६॥

नियतस्य तु संन्यासः कर्मणो नोपपद्यते ।
मोहात्तस्य परित्यागः तामसः परिकीर्तितः ॥१८–७॥

दुःखमित्येव यत्कर्म कायक्लेशभयात् त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥१८–८॥

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ।
संगं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः ॥१८–९॥

न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते ।
त्यागी सत्त्वसमाविष्टः मेधावी छिन्नसंशयः ॥१८–१०॥

न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥१८–११॥

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् ।
भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित् ॥१८-१२॥

पंचैतानि महाबाहो कारणानि निबोध मे ।
सांख्ये कृतांते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥१८-१३॥

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधाश्च पृथक्चेष्टाः दैवं चैवात्र पंचमम् ॥१८-१४॥

शरीरवाङ्मनोभिर्यत् कर्म प्रारभते नरः ।
न्याय्यं वा विपरीतं वा पंचैते तस्य हेतवः ॥१८-१५॥

तत्रैवं सति कर्तारं आत्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वात् न स पश्यति दुर्मतिः ॥१८-१६॥

यस्य नाहंकृतो भावः बुद्धिर्यस्य न लिप्यते ।
हत्वाऽपि स इमान् लोकान् न हंति न निबध्यते ॥१८-१७॥

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ।
करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः ॥१८-१८॥

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः ।
प्रोच्यते गुणसंख्याने यथावत् शृणु तान्यपि ॥१८-१९॥

सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तत् ज्ञानं विद्धि सात्त्विकम् ॥१८-२०॥

पृथक्त्वेन तु यत् ज्ञानं नाना भावान् पृथग्विधान् ।
वेत्ति सर्वेषु भूतेषु तत् ज्ञानं विद्धि राजसम् ॥१८-२१॥

यत्तु कृत्स्नवदेकस्मिन् कार्ये सक्तमहैतुकम् ।
अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम् ॥१८-२२॥

नियतं संगरहितं अरागद्वेषतः कृतम् ।
अफलप्रेप्सुना कर्म यत्तत् सात्त्विकमुच्यते ॥१८-२३॥

यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः ।
क्रियते बहुलायासं तद् राजसमुदाहृतम् ॥१८–२४॥

अनुबंधं क्षयं हिंसां अनवेक्ष्य च पौरुषम् ।
मोहाद् आरभ्यते कर्म यत्तत् तामसमुच्यते ॥१८–२५॥

मुक्तसंगोऽनहंवादी धृत्युत्साहसमन्वितः ।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ॥१८–२६॥

रागी कर्मफलप्रेप्सुः लुब्धो हिंसात्मकोऽशुचिः ।
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥१८–२७॥

अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः ।
विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥१८–२८॥

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु ।
प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय ॥१८–२९॥

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ।
बंधं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥१८–३०॥

यया धर्ममधर्मं च कार्यं चाकार्यमेव च ।
अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी ॥१८–३१॥

अधर्मं धर्ममिति या मन्यते तमसाऽवृता ।
सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥१८–३२॥

धृत्या यया धारयते मनः प्राणेंद्रियक्रियाः ।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥१८–३३॥

यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन ।
प्रसंगेन फलाकांक्षी धृतिः सा पार्थ राजसी ॥१८–३४॥

यया स्वप्नं भयं शोकं विषादं मदमेव च ।
न विमुंचति दुर्मेधाः धृतिः सा पार्थ तामसी ॥१८–३५॥

सुखं त्विदानीं त्रिविधं श्रुणु मे भरतर्षभ ।
अभ्यासाद् रमते यत्र दुःखांतं च निगच्छति ॥१८–३६॥

यत्तदग्रे विषमिव परिणामे अमृतोपमम् ।
तत्सुखं सात्त्विकं प्रोक्तं आत्मबुद्धिप्रसादजम् ॥१८–३७॥

विषयेंद्रियसंयोगात् यत्तदग्रे अमृतोपमम् ।
परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥१८–३८॥

यदग्रे चानुबंधे च सुखं मोहनमात्मनः ।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥१८–३९॥

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात् त्रिभिर्गुणैः ॥१८–४०॥

ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप ।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥१८–४१॥

शमो दमस्तपः शौचं क्षांतिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥१८–४२॥

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥१८–४३॥

कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम् ।
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥१८–४४॥

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः।
स्वकर्मनिरतः सिद्धिं यथा विंदति तत् शृणु ॥१८–४५॥

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानवः ॥१८–४६॥

श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् ।
स्वभावनियतं कर्म कुर्वन्नाऽप्नोति किल्बिषम् ॥१८–४७॥

सहजं कर्म कौंतेय सदोषमपि न त्यजेत् ।
सर्वारंभा हि दोषेण धूमेनाग्निरिवावृताः ॥१८–४८॥

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ।
नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥१८–४९॥

सिद्धिं प्राप्तो यथा ब्रह्म तथाऽप्नोति निबोध मे ।
समासेनैव कौंतेय निष्ठा ज्ञानस्य या परा ॥१८–५०॥

बुद्ध्या विशुद्धया युक्तः धृत्याऽत्मानं नियम्य च ।
शब्दादीन् विषयान् त्यक्त्वा रागद्वेषौ व्युदस्य च ॥१८–५१॥

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥१८–५२॥

अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्ममः शांतः ब्रह्मभूयाय कल्पते ॥१८–५३॥

ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति ।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥१८–५४॥

भक्त्या मां अभिजानाति यावान् यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरम् ॥१८–५५॥

सर्वकर्माण्यपि सदा कुर्वाणो मद् व्यपाश्रयः ।
मत् प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥१८–५६॥

चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः ।
बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥१८–५७॥

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात् तरिष्यसि ।
अथ चेत्वं अहंकारात् न श्रोष्यसि विनंक्ष्यसि ॥१८–५८॥

यदहंकारमाश्रित्य न योत्स्य इति मन्यसे ।
मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥१८–५९॥

स्वभावजेन कौंतेय निबद्धः स्वेन कर्मणा ।
कर्तुं नेच्छसि यन्मोहात् करिष्यस्यवशोऽपि तत् ॥१८-६०॥

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यंत्रारूढानि मायया ॥१८-६१॥

तमेव शरणं गच्छ सर्वभावेन भारत ।
तत् प्रसादात् परां शांतिं स्थानं प्राप्स्यसि शाश्वतम् ॥१८-६२॥

इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया ।
विमृश्यैतद् अशेषेण यथेच्छसि तथा कुरु ॥१८-६३॥

सर्वगुह्यतमं भूयः शृणु मे परमं वचः ।
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥१८-६४॥

मन्मना भव मद्भक्तः मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥१८-६५॥

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यः मोक्षयिष्यामि मा शुचः ॥१८-६६॥

इदं ते नातपस्काय नाभक्ताय कदाचन ।
न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥१८-६७॥

य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति ।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥१८-६८॥

न च तस्मान् मनुष्येषु कश्चिन्मे प्रियकृत्तमः ।
भविता न च मे तस्मात् अन्यः प्रियतरो भुवि ॥१८-६९॥

अध्येष्यते च य इमं धर्म्यं संवादमावयोः ।
ज्ञानयज्ञेन तेनाहं इष्टः स्यामिति मे मतिः ॥१८-७०॥

श्रद्धावाननसूयश्च शृणुयादपि यो नरः ।
सोऽपि मुक्तः शुभान् लोकान् प्राप्नुयात् पुण्यकर्मणाम् ॥१८-७१॥

कच्चिदेतत् श्रुतं पार्थ त्वयैकाग्रेण चेतसा ।
कच्चिदज्ञानसम्मोहः प्रनष्टस्ते धनंजय ॥१८–७२॥

अर्जुन उवाच
नष्टो मोहः स्मृतिर्लब्धा त्वत् प्रसादान्मयाऽच्युत ।
स्थितोऽस्मि गतसंदेहः करिष्ये वचनं तव ॥१८–७३॥

संजय उवाच
इत्यहं वासुदेवस्य पार्थस्य च महात्मनः ।
संवादमिमं अश्रौषं अद्भुतं रोमहर्षणम् ॥१८–७४॥

व्यासप्रसादात् श्रुतवान् ऐतद् गुह्यमहं परम् ।
योगं योगेश्वरात् कृष्णात् साक्षात् कथयतः स्वयम् ॥१८–७५॥

राजन् संस्मृत्य संस्मृत्य संवादमिमं अद्भुतम् ।
केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥१८–७६॥

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः ।
विस्मयो मे महान् राजन् हृष्यामि च पुनः पुनः ॥१८–७७॥

यत्र योगेश्वरो कृष्णः यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिः ध्रुवा नीतिर्मतिर्मम ॥१८–७८॥

ॐ तत्सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे मोक्षसंन्यासयोगो नाम अष्टादशोध्यायः
॥श्री कृष्णार्पणमस्तु ॥



**उडुपि श्री पुत्तिगे मठाधीशाः**
**परमपूज्य श्री श्री सुगुणेंद्रतीर्थ श्रीपादाः**
**तथा श्री श्री शुश्रींद्रतीर्थ श्रीपादाः**
**उभयोः आशीर्वादेन प्रकाशितं इदम्**




Shri Krishna Vrundavana NC

Sujnana Religious & Charitable Foundation